# A

**22128** **120 MINUTES**

1. 'अथ शब्दानुशासनम्' इत्यत्र 'अथ'शब्दस्य अर्थः कः?

   A) आनन्तर्यम् B) अधिकारः C) मङ्गलं D) प्रश्नः

2. रक्षार्थं वेदानां किम् अध्येयम्?

   A) वेदान्तः B) व्याकरणम् C) साहित्यं D) दर्शनं

3. शब्दार्थसंबन्धः महाभाष्यरीत्या कीदृशः?

   A) सिद्धः B) अनित्यः C) संकेतः D) न कोपि

4. वृत्तिसमवायार्थः उपदेशः केषाम्?

   A) वेदानाम् B) वाक्यानाम् C) वर्णानाम् D) दर्शनानां

5. 'व्याकरणम्' इत्यस्य कः पदार्थः?

   A) लक्षणसूत्रं B) लक्ष्यशब्दः

   C) लक्ष्यलक्षण-उभयं D) न उभयमपि

6. वेदेषु कः वेदः अतिप्राचीनः भवति?

   A) ऋग्वेदः B) यजुर्वेदः C) सामवेदः D) अथर्ववेदः

7. वैदिकानां पदानाम् अर्थबोधकम् वेदाङ्गम् किम्?

   A) शिक्षा B) व्याकरणं C) छन्दः D) निरुक्तं

8. उतरे रामचरिते कः विशिष्यते?

   A) भासः B) भारविः C) भवभूतिः D) माघः

9. योजयत –

   a) दिलीपमहाराजः 1. नैषधं

   b) नलमहाराजः 2. रघुवंशम्

   c) पार्वतीपरिणयः 3. माघकाव्यं

   d) शिशुपालवधः 4. कुमारसंभवं

   A) **a-1, b-2, c-3, d-4** B) **a-2, b-1, c-4, d-3**

   C) **a-3, b-4, c-2, d-1** D) **a-2, b-3, c-4, d-1**

10. उद्दण्डशास्त्रिणा महाकविना विरचितं संदेशकाव्यं किम्?

A) कोकिलसंदेशः B) मयूरसंदेशः

C) मेघसंदेशः D) एषु न किमपि

11. केरलकालिदासः कस्य ग्रन्थस्य भाषाविवर्तनं कृतवान्?

A) रघुवंशस्य B) शाकुन्तलस्य

C) मेघदूतस्य D) न कस्यापि

12. अष्टाङ्गहृदयस्य आयुर्वेदग्रन्थस्य रचयिता कः?

A) आर्यभटः B) भास्करः C) वराहमिहिरः D) वाग्भटः

13. केरलतन्त्रविद्यापरम्परायाम् अतिप्रसिद्धः ग्रन्थः कः?

A) तन्त्रसंग्रहः B) शब्दरत्नमाला

C) तन्त्रसमुच्चयः D) गणितप्रकाशिका

14. अस्मत्प्रत्ययगोचरः कः ब्रह्मसूत्रभाष्ये उक्तः?

A) ईश्वरः B) आत्मा

C) शरीरं D) पूर्वोक्तेषु न किमपि

15. शुक्तिका हि रजतवत् अवभासते – इति कस्य उदाहरणम्?

A) अध्यासस्य B) प्रमाज्ञानस्य C) अपवादस्य D) न कस्यापि

16. ब्रह्मजिज्ञासा' इति पदे कः समासः?

A) चतुर्थीसमासः B) पञ्चमीसमासः

C) षष्ठीसमासः D) सप्तमीसमासः

17. जन्माद्यस्य यतः इत्यत्र 'अस्य' इति पदस्य अर्थः कः?

A) वेदस्य B) ईश्वरस्य C) ब्रह्मणः D) प्रपञ्चस्य

18. 'तत्तु समन्वयात्' – अत्र 'तत्'पदेन किं विवक्षितम्?

A) जगत्कारणत्वं B) शास्त्रयोनित्वम्

C) ब्रह्मसत्यत्वम् D) मिथ्यात्वं

19. PIE भाषाकुटुम्बस्य कस्यां शाखायां संस्कृतम् अन्तर्भवति?

A) Aryan B) Germanic C) Italian D) Greek

20. ‘प’वर्गस्य वर्णानाम् उच्चारणस्थानं किम्?

A) तालु B) दन्ताः C) मूर्धा D) ओष्ठौ

21. मूर्धन्यवर्णाः केभ्यः जाताः इति भाषाशास्त्रनियमः सूचयति?

A) दन्त्येभ्यः B) तालव्येभ्यः C) कण्ठ्येभ्यः D) औष्ठ्येभ्यः

22. स्वर्ण – सुवर्ण इति कस्य उदाहरणम्?

A) वर्णविपर्ययः - Metathesis B) अल्लोपः –Syncope

C) मध्यमलोपः – Haplology D) स्वरभक्तिः –Anaptyxis

23. ‘तैलम्’ इति पदस्य अर्थविपरिणामः कीदृशः?

A) सामान्यीकरणम् B) विशेषीकरणम्

C) अन्यथाकरणम् D) न पूर्वोक्तं किमपि

24. संबोधने प्रथमाविभक्तितः कस्मिन् वचने भेदः भवति?

A) एकवचने B) द्विवचने C) बहुवचने D) न कुत्रापि

25. यशोधनो धेनुमृषेर्मुमोच – कः?

A) रघुमहाराजः B) वसिष्ठः C) दिलीपः D) सुदक्षिणा

26. रघुवंशे द्वितीयसर्गे प्रतिपाद्यविषयः कः?

A) रघुदिग्विजयः B) नन्दिनीवरप्रदानं

C) रघुमहाराजस्य जन्म D) अन्यदेव

27. अल्पस्य हेतोर्बहु हातुमिच्छन् कीदृशः प्रतिभासि इति सिंहः अकथयत्?

A) विचारमूढः B) आपातमूढः C) रक्षानिपुणः D) गुरुभक्तियुतः

28. स कीरवन्मानुषवागब्रवीत् – कः?

A) नलमहाराजः B) हंसपक्षी C) दमयन्ती D) न कोपि

29. केन सह न योगयोग्यासि इति दमयन्ती आवेदिता?

A) नलमहाराजेन B) मानुषेण

C) इन्द्रादिदेवेन D) नलेतरेण

30. काव्यस्य आत्मा स एवार्थः – कः?

A) वाच्यार्थः B) लक्ष्यार्थः C) प्रतीयमानार्थः D) एषु न कोपि

31. रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि – कस्मिन् पदे ध्वनिः?

A) रविकिरणपदे
B) भवन्ति इति पदे
C) प्रथमकमलपदे
D) द्वितीयकमलपदे

32. कविव्यापारवक्रत्वप्रकाराः संभवन्ति कति?

A) पञ्च
B) षट्
C) सप्त
D) अनेके

33. मैथिली तस्य दाराः – इत्यत्र वक्रताव्यापारः कस्मिन् अंशे अस्ति?

A) मैथिलीपदे
B) तस्य इति पदे
C) दारपदे
D) बहुवचने

34. अलङ्काराः सर्वे कस्यां वक्रतायाम् अन्तर्भवन्ति?

A) पदवक्रतायां
B) वाक्यवक्रतायां
C) प्रकरणवक्रतायां
D) वर्णवक्रतायां

35. काव्यं सद्यः कस्मै प्रयोजनाय भवति?

A) यशसे अर्थकृते
B) व्यवहारविदे
C) शिवेतरक्षतये
D) परनिर्वृतये

36. मुख्यार्थबाधे तद्योगे कः पदव्यापारः संभवति?

A) अभिधा
B) लक्षणा
C) व्यञ्जना
D) सर्वोऽपि

37. 'गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु' – अत्र व्यङ्ग्यार्थः कः?

A) मयि खेदः न कार्यः
B) कुरुषु खेदः न कार्यः
C) रुषु खेदः कार्यः
D) मयि खेदः कार्यः

38. समवायः कतिविधः?

A) एकविधः
B) द्विविधः
C) त्रिविधः
D) अनन्तविधः

39. वायुः कीदृशः?

A) रूपस्पर्श-उभयवान्
B) रूपस्पर्शरहितः
C) रूपरहितस्पर्शवान्
D) रूपवान् स्पर्शरहितः

40. संस्कारमात्रजन्यं ज्ञानं किम्?

A) अनुभवः
B) प्रत्यभिज्ञानं
C) स्मृतिः
D) भ्रमज्ञानं

41. वैशेषिकमते पदशक्तिः नाम का?

A) मनुष्यसंकेतः B) मातापितृसंकेतः
C) शास्त्रकारसंकेतः D) ईश्वरसंकेतः

42. निश्चितसाध्यवान् कः?

A) पक्षः B) सपक्षः C) विपक्षः D) हेतुः

43. सुवर्णं किं द्रव्यम्?

A) पृथिवी B) आपः C) तेजः D) वायुः

44. एकैकस्या राशेः कति अंशाः भवन्ति?

A) नव B) द्वादश C) पञ्चदश D) त्रिंशत्

45. ग्रहस्य षट्सु वर्गेषु संपूर्णस्य ग्रहभागस्य किं नाम?

A) नवांशः B) क्षेत्रं C) होरा D) मुहूर्तं

46. एतेषु चरलग्नं किं भवति?

A) मेषः B) ऋषभः
C) मिथुनं D) पूर्वोक्तं न किमपि

47. ग्रहाणां व्ययस्थानं कतमं भवति?

A) प्रथमं B) नवमं C) दशमं D) द्वादशं

48. शुक्रस्य पर्यायशब्दः कः भवति?

A) भृगुः B) अङ्गिराः C) केतुः D) असुरः

49. कालस्य पुरुषरूपस्य पादस्थानीयं किम् ?

A) मेषः B) मिथुनं C) कन्या D) मीनं

50. राशिम् अधिपतिं च योजयत

| | |
|---|---|
| a. मेषः | 1. भौमः |
| b. ऋषभः | 2. शुक्रः |
| c. मिथुनं | 3. बुधः |
| d. कटकं | 4. चन्द्रः |

A) a-1, b-2, c-3, d-4 B) a-2, b-1, c-3, d-4
C) a-1, b-2, c-4, d-3 D) a-3, b-2, c-4, d-1

51. श्रुतौ निगदिताः क्रियाः कति?

A) दश B) द्वादश C) षोडश D) अष्टादश

52. उल्काभूचलनाद्याः कस्मिन् कर्मणि वर्ज्याः?

A) उपनयने B) विवाहे

C) न कुत्रापि D) सर्वस्मिन् अपि

53. गृहप्रवेशे अत्यन्तम् अनुचितं लग्नम् किम्?

A) चरम् B) स्थिरम्

C) चरस्थिर-उभयलग्नं D) न किमपि

54. कस्मिन् वत्सरे अक्षरारम्भः युज्यते?

A) द्वितीये B) तृतीये C) तुरीये D) पञ्चमे

55. षट्सु दोषेषु किम् न अन्तर्भवति?

A) अधिमासः B) अम्हस्पतिः

C) गुरुमौढ्यम् D) संक्रमणं

56. अहोरात्रविकल्पम् ज्योतिषे कथं व्यवहरन्ति?

A) अम्हस्पतिः B) राशिः C) होरा D) क्षेत्रं

57. ज्योतिषे स्कन्धत्रये किम् नान्तर्भवति?

A) मुहूर्तं B) होरा C) संहिता D) सिद्धान्तः

58. बृहज्जातके राशिप्रभेदः कस्मिन् अध्याये विषयः भवति?

A) प्रथमाध्याये B) द्वितीयाध्याये

C) तृतीयाध्याये D) चतुर्थाध्याये

59. भयशब्देन योगे कः समासः प्रसक्तः भवति?

A) द्वितीयासमासः B) तृतीयासमासः

C) चतुर्थीसमासः D) पञ्चमीसमासः

60. द्वन्द्वसमासः कस्मिन् अर्थे युज्यते?

A) इवार्थे B) चार्थे C) समानार्थे D) समाहारार्थे

61. ‘इमे’ इति रूपं प्रथमाविभक्तौ कुत्र न उपपन्नं भवति?

A) पुंसि बहुवचने B) स्त्रियां द्विवचने

C) नपुंसके द्विवचने D) पूर्वोक्तेषु न कुत्रापि

62. योजयत –

a. उपेन्द्रः 1. अयवायावसंधिः

b. सुध्युपास्यः 2. वृद्धिसंधिः

c. नायकः 3. गुणसंधिः

d. गङ्गौघः 4. यण् संधिः

A) a-1, b-2, c-3, d-4 B) a-2, b-3, c-4, d-1

C) a-3, b-4, c-1, d-2 D) a-4, b-1, c-2, d-3

63. ‘प्र’पूर्वकः‘स्था’धातुः कस्मिन् परिवर्तते?

A) परस्मैपदे B) आत्मनेपदे

C) उभयपदे D) नैव परिवर्तते

64. ‘जक्षुः’ इत्यत्र कः धातुः?

A) जि जये B) अद भक्षणे C) क्षि निवासे D) कृञ् करणे

65. ‘चुर स्तेये’ इति धातोः वर्तमाने कः प्रयोगः?

A) चुरति B) चोरति C) चौर्यति D) चोरयति

66. मोक्षे इच्छा अस्ति – अत्र सप्तमी विभक्तिः कस्मिन् अर्थे भवति?

A) औपश्लेषिके B) वैषयिके

C) अभिव्यापके D) सर्वस्मिन् अर्थे

67. तृतीयाविभक्तिः कस्य शब्दस्य योगे भवेत्?

A) सहशब्दस्य B) नमः शब्दस्य

C) भयशब्दस्य D) ‘दा’धातोः

68. रुच्यर्थानां प्रीयमाणः इति सूत्रेण का संज्ञा विधीयते?

A) कर्म B) करणम् C) संप्रदानम् D) अपादानम्

69. ‘भवामि’ इत्यादौ दीर्घविधायकःसूत्रभागः कः?

A) अकः सवर्णे B) अतो दीर्घो यञ्

C) सुपि च D) पूर्वोक्तं न किमपि

70. एतेषु माङ्योगे कः साधुः प्रयोगः ?

A) मा अभूत्
B) मा आभूत्
C) मा भूत्
D) एतेषु न कोपि

71. 'उगितश्च' इति सूत्रस्य उदाहरणं किम्?

A) भवती
B) गौरी
C) वधूटी
D) भवानी

72. द्विगुसमासे अदन्तात् किं लिङ्गं विधीयते?

A) पुंलिङ्गं
B) स्त्रीलिङ्गं
C) नपुंसकलिङ्गं
D) सर्वमपि

73. आचार्यस्य पत्नी इत्यर्थे कः प्रयोगः?

A) आचार्या
B) आचार्यी
C) आचार्याणी
D) आचार्यवती

74. आश्चर्यचूडामणिना सह प्रदत्तम् आभरणं किम्?

A) नूपुरं
B) वलयं
C) माल्यं
D) अङ्गुलीयकं

75. शक्तिभद्रेण रामायणकथायाः भागः कस्मात् आरभ्य नाटकीकृतः?

A) श्रीरामजननात्
B) श्रीसीताविवाहात्
C) शूर्पणखाप्रवेशात्
D) हनूमतः समागमात्

76. आश्चर्यचूडामणिनाटकं कस्मात् देशात् आगतं कथ्यते?

A) दक्षिणापथात्
B) उत्तरदेशात्
C) प्राच्यप्रदेशात्
D) अन्यस्मादेव

77. शकुन्तलायाः प्रियसखी का?

A) पद्मावती
B) प्रियंवदा
C) मालविका
D) आसु न कापि

78. यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया – कस्य हृदयम् ?

A) दुष्यन्तस्य
B) अनसूयायाः
C) कण्वस्य
D) विश्वामित्रस्य

79. वासवदत्ता केन स्वप्ने दृष्टेति संभाविता?

A) उदयनेन
B) यौगन्धरायणेन
C) पद्मावत्या
D) पूर्वोक्तात् अन्येन

80. सा हि दग्धाप्यदग्धा – कुतः?

A) तपःप्रभावात्  B) देवप्रसादात्
C) विधिवशात्  D) भर्तृस्नेहात्

81. न्यायवैशेषिकमते जगतः मूलकारणं किम्?

A) मूलप्रकृतिः  B) परमाणवः  C) आकाशः  D) ब्रह्म

82. व्याप्तिबोधकम् अवयववचनं किम्?

A) प्रतिज्ञा  B) हेतुः  C) उदाहरणं  D) उपनयः

83. शब्दः नित्यः चाक्षुषत्वात् इत्यत्र कः हेत्वाभासः?

A) आश्रयासिद्धिः  B) स्वरूपासिद्धिः
C) व्याप्यत्वासिद्धिः  D) व्यभिचारः

84. पटद्रव्यं प्रति किम् असमवायिकारणम्?

A) तन्तवः  B) तन्तुसंयोगः  C) तन्तुवायः  D) तन्तुत्वम्

85. वैशेषिके गुणाः कति गणिताः ?

A) सप्त  B) नव  C) चतुर्विंशतिः  D) कर्म

86. नव्यन्यायमते मङ्गलस्य फलं किम्?

A) ग्रन्थसमाप्तिः  B) विघ्नध्वंसः
C) विघ्नात्यन्ताभावः  D) विघ्नप्रागभावः

87. संसर्गाभावः कतिविधः?

A) एकविधः  B) द्विविधः  C) त्रिविधः  D) चतुर्विधः

88. भूतानां पञ्चीकरणे कृते तत्तद्भूतव्यवहारः किमपेक्षया क्रियते?

A) आधिक्यात्  B) सामीप्यात्  C) अभिभवात्  D) आरोपात्

89. आवरणशक्तिः विक्षेपशक्तिः च कस्य शक्तिद्वयम् उच्यते?

A) ब्रह्मणः  B) जीवस्य  C) अचेतनस्य  D) अविद्यायाः

90. तत्वमसि इति वाक्ये पदयोः का लक्षणा?

A) जहल्लक्षणा  B) अजहल्लक्षणा
C) जहदजहल्लक्षणा  D) निरूढलक्षणा

91. माधवन् नम्बूदिरि कस्यां विज्ञानशाखायां प्रसिद्धः अभूत्?

A) आयुर्वेदे B) तन्त्रविद्यायां C) योगविद्यायां D) ज्योतिषे

92. कल्याणवर्मणः होराशास्त्रग्रन्थः कः?

A) सारावली B) तत्वविवेकं C) मुहूर्ततत्त्वं D) बृहज्जातकं

93. लीलावती इति प्रसिद्धस्य ग्रन्थस्य विषयः कः?

A) अलङ्कारः B) गणितं

C) चिकित्सा D) पूर्वोक्तं किमपि न

94. ब्राह्मस्फुटसिद्धान्तस्य कर्ता कः?

A) ब्रह्मगुप्तः B) विष्णुगुप्तः C) आर्यभटः D) भास्करः

95. भारतीयज्योतिषविज्ञानस्य उपज्ञाता कः?

A) आर्यभटः B) वराहमिहिरः C) भास्करः D) कल्याणवर्मा

96. सांख्यमते कस्य कर्तृत्वम् इष्यते?

A) पुरुषस्य B) प्रकृतेः C) ईश्वरस्य D) कालस्य

97. 'सुरभि चन्दनम्' इति प्रत्यक्षे कः संनिकर्षः?

A) सामान्यलक्षणा B) ज्ञानलक्षणा

C) योगलक्षणा D) संयोगलक्षणा

98. क्षणिकविज्ञानमेव आत्मा इति कस्य मतम्?

A) बौद्धस्य B) जैनस्य C) वेदान्तिनः D) नैयायिकस्य

99. आकाशस्य अनुमाने किं लिङ्गम्?

A) मेघः B) वायुः C) शब्दः D) गन्धः

100. सुखस्य अधिकरणं किम्?

A) इन्द्रियम् B) मनः C) प्राणः D) आत्मा

101. सत्ता इति जातिः कुत्र अस्ति?

A) द्रव्ये B) गुणे C) कर्मणि D) त्रिषु अपि

102. 'अग्निना सिञ्चति' इति वाक्ये किं नास्ति इति अप्रमाणं भवति?

A) आकाङ्क्षा B) योग्यता C) संनिधिः D) तात्पर्यम्

103. साधनचतुष्टये किं न अन्तर्भवति?

A) मुमुक्षुत्वं B) फलभोगविरागः

C) जिज्ञासा D) नित्यानित्यविवेकः

104. कोशत्रयं मिलितम् किम् इत्युच्यते?

A) सूक्ष्मशरीरं B) इन्द्रियं

C) विज्ञानमयं D) आनन्दमयम्

105. गतासून् अगतासून् च न अनुशोचन्ति – के?

A) पण्डिताः B) पामराः C) क्षत्रियाः D) योद्धारः

106. अशोच्यान् अन्वशोचः त्वम् – अशोच्याः के?

A) योद्धारः B) पाण्डवाः

C) भीष्मद्रोणादयः D) प्रजाः

107. 'मात्रास्पर्शाः' इत्यत्र मात्राः काः?

A) शरीराणि B) इन्द्रियाणि C) भूतानि D) आत्मा

108. न जायते म्रियते वा विपश्चित् इत्युक्तः विषयः कः?

A) शरीरस्य नाशः B) ज्ञाननित्यत्वं

C) आत्मनित्यत्वम् D) ईश्वरनित्यत्वम्

109. "एकं सांख्यं च योगं च" - इति कस्मिन् ग्रन्थे उच्यते?

A) सांख्यशास्त्रे B) योगसूत्रे C) उपनिषदि D) भगवद्गीतायां

110. 'उपनिषद्' इति पदे धातोः अर्थः कः?

A) गमनं B) विशरणं C) स्थानं D) अन्यदेव

111. 'मृत्यवे त्वा ददामि' इति कः कं अवदत्?

A) नचिकेताः पितरं B) पिता नचिकेतसं

C) नचिकेताः यमं D) यमः नचिकेतसं

112. नचिकेतसः वरत्रये प्रथमः कः?

A) पितुः शान्तत्वं B) अग्निविद्या

C) आत्मज्ञानं D) अन्यदेव किञ्चित्

113. अयं लोको नास्ति पर इति मानी कस्य वशम् आपद्यते?

A) ब्रह्मण: B) यमस्य C) देवलोकस्य D) न कस्यापि

114. नायं हन्ति न हन्यते – कः?

A) आत्मा B) ईश्वरः C) प्रकृतिः D) शरीरं

115. वृत्तपरिगणने 'ज'गण: कस्मिन् अंशे गौरवं याति?

A) आदौ B) मध्ये C) अवसाने D) सर्वत्र

116. एतेषु किं मात्रावृत्तं भवति?

A) आर्या B) अनुष्टुप् C) मन्दाक्रान्ता D) मालिनी

117. 21 अक्षराणि कस्मिन् वृत्ते संभवन्ति?

A) मन्दाक्रान्ता B) शार्दूलविक्रीडितम्

C) शिखरिणी D) स्रग्धरा

118. काव्यलिङ्गालङ्कारस्य स्वरूपं किम्?

A) समर्थनीयस्य समर्थनं B) वर्ण्यावर्ण्यानाम् धर्मैक्यं

C) हेत्वादीनां संभावना D) अन्यस्य आरोपाय निह्नवः

119. लिम्पतीव तमोङ्गानि वर्षतीवाञ्जनं नभः – अत्र कः अलङ्कारः?

A) रूपकम् B) उत्प्रेक्षा C) उल्लेखः D) प्रतीपं

120. रूपकालङ्कारस्य उदाहरणं किम्?

A) इन्दुरिन्दुरिव श्रीमान् B) त्वल्लोचनसमं पद्मम्

C) मुखचन्द्रोतिरिच्यते D) हंसीव कृष्ण ते कीर्तिः

********************